स्वर्गेमर्त्ये चपाताले नास्तिपश्चाक्षरं (रे) समम्

* * * *

Colophon :

इति शांकरसंहितायामुपरिभागे वीरमाहेश्वरप्रशंसा नामाशीतितमोऽध्यायः ।

* * * *

Colophon :

इति शाङ्करसंहितायां द्वितीयोऽध्यायः

End :

नदीनामुत्तमं गङ्गा धर्माणां शङ्कराश्रयः ।
गिरीणां श्रीगिरिः श्रेष्ठो देवानां प्रवरः शिवः ॥
य इदं पुण्यमाख्यानं शृणोत्येकाग्रमानसः ।
शिवलिङ्गार्चनाकाले तस्मै शम्भुः प्रसीदति ॥

पठति श्रावयेद्यस्तु धर्माख्यानमिदं नरः ।
त्रिसप्ततिकुलोपेतः शिवलोके महीयते ॥
गृहे यस्येदमाख्यानं पुस्तकं तिष्ठति ध्रुवम् ।
तस्यैश्वर्यसमृद्धिः स्यान्नाग्निचोरभयं भवेत् ॥

Colophon :

इति शाङ्करसंहितायां शिवभक्तदासपूजा चतुरशीतितमोऽध्यायः ।

D. No. 16561.

Palm-leaf. 13 × 1⅛ inches. Pages, 16. Lines, 5 on a page. Telugu. Slightly injured. Extent 98 Granthas.

वीरशैवलिङ्गपूजाविधिः

VĪRAŚAIVALIṄGAPŪJĀVIDHIḤ.

Begins on foll. 1*a*. The other work herein is Viṣṇupārmyavacanāni 9*a*. Deals with the details of worship of the Liṅga by the Vīraśaivites.

Incomplete.

Beginning :

सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहकः ।
संहारस्य तथा रुद्रः तयोर्नित्यं नियामकः ॥
एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः ।
मयानुसृष्टा भविता सर्वलोकप्रवर्तकः ॥ इति ॥

* * * * *

महाभारते द्रोणपर्वणि व्यासः—
देवदेवस्त्वाचिन्त्यात्मा अजयो विष्णुव्ययः ।
सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति कं विभुम् ॥
तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥

End :

वेदान्तसारसंग्रहे वीरशैवाचारसिद्धान्ते—
वीशब्देनोच्यते विद्या शिवब्रह्मैक्यबोधिका ।
तस्यां रमन्ति ये शैवाः वीरशैवा इति स्मृताः ॥

D. No. 16562.

Pages, 18. Lines, 6 in a page. Extent, 110 Granthas.

विष्णुपारम्यवचनानि

VIṢṆUPĀRAMYAVACANĀNI.

Begins on foll. 9*a* of the MS. described under Previous No.
Statements in support of the supremacy of Viṣṇu over other gods.
Incomplete. Wants beginning.

Beginning :

श्रीमन्नारायणं नाम एकादशतु काम्यदम् ।
मुक्तिदाष्टकमेतानि सत्वे परमवैदिके ॥

गारुडपुराणे—

सत्वनिष्ठानि पुरुषा विष्णुमेव यजन्ति ते ।
ब्रह्माणं राजसास्सर्वे तमोनिष्ठास्तु शूलिनम् ॥

नारदसंहितायाम्—

राक्षसाः कलिमाश्रित्य जायन्ते ब्रह्मयोनिषु ।
विष्णुवैष्णवविद्वेषाः प्रचरन्ति हि तामसाः ॥

अन्तः शान्तं बहिश्शैवं सभामध्ये तु वैष्ववम् ।
कलौ केचित्प्रवर्तन्ते वर्णाश्रमजना मुने॥

*   *   *   *   *

सहस्रनामसदृशं विष्णोर्नारायणस्य तु ।
षडक्षरं महामन्त्रं रघूणां कुलवर्धनम् ॥

जपन् वै सततं देवि सदानन्दसुधाप्लुतम् ।
एतत्ते सर्वमाख्यातं त्वया पृष्टं शुभानने ॥

End

सितः कृते तथा रक्तास्त्रेतायां द्वापरे पुनः ।
नीलः कृष्णः कलावेवं वर्णैर्नारायणो भवेत् ॥

शुक्लोरक्तस्तथा पीतः इदानीं कृष्णतां गतः ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

मनुस्मृतौ—प्रशासितारं सर्वेषामणीयांस . . . .

D. No. 16563.

Palm-leaf. 10½ × 1 inches. Pages, 128. Lines, 4 in a page. Telugu and Nandināgarī. Slightly injured. Extent, 1,134 Granthas.

वैखानसागमः

VAIKHĀNASĀGAMAḤ.

Begins on foll 1*a*. The other work herein is Puṇyāham 65*a*.

Deals with rules for worshipping Viṣṇu.

Incomplete.

Beginning :

अथ पीठार्चनं वक्ष्यामो द्वादशनामानि केशवादीननु । ऊर्ध्वपुण्ड्रान् द्वादशकुर्यात् । पद्माक्षतुलसीमयं धारयेत् । सोत्तरीयो . . . शामङ्गुलीयकमुभयपवित्रं धारयेत् । कूर्मपीठे पद्मासनमाधाय सर्वाधारं सनातनं दिव्यकमठरूपं पीठस्य मूलेऽभ्यर्च्य

* * * *

Colophon :

इति वैखानसे आङ्गिरसप्रोक्ते आनन्दसंहितायां विखनस्संवादे पञ्चाशः पटलः ।

End :

विचक्रमेति मुखवासं दत्वा द्वादशाष्टाभ्यां संस्तूय प्रणामं कुर्यात् । अतन्द्रितो नित्यं गृहे देवायतने वा भक्त्या भगवन्तं नित्यं नारायणमर्चयेत् । तद्विष्णोः परमं पदं गच्छतुरिति विज्ञायते ।

श्रीविष्णुः कमलानाथो वासुदेवः सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ॥
श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ।
चतुर्भुजश्चचक्रांशगदाशङ्खाद्युदायुधः ॥

D. No. 16564.

Palm-leaf. 16 × 1½ inches. Pages, 28. Lines, 7 in a page. Grantha. Slightly injured. Extent, 405 Granthas.

पिण्डपितृयज्ञः

PIṆḌAPĪTṚYAJÑAḤ.

Begins on foll. 1*a*. The other works herein are Vedāntadeśikastutiḥ 15*a*. Ācāryaguṇādarśa 20*a*.

Same work as that described under D. No. 1112.

Incomplete.

D. No. 16565.

Pages, 10. Lines, 5 in a page. Extent, 137 Granthas,

वेदान्तदेशिकस्तुतिः

VEDĀNTADEŚIKASTUTIḤ.

Begins on foll. 15*a* of the MS. described under Previous No. 16564.

Stanzas in praise of Vedāntadeśika, the renowned Vaiśṇavite philosopher.

Incomplete and wants some leaves.

Beginning :

सेवे वेङ्कटनाथं सततवृषाचलस्थितं भूयः ।
अरिदरकरमवतारादापन्नं स्वयम्भुवो हृषम् ॥

वन्दारुसुमनोवृन्दवृन्दारतरुमाश्रये ।
बान्धवं सर्वजगतां सैन्धवं कन्धरोपरि ॥

वन्दे वारिधिकन्यां विज्ञानाय हृदि विश्वसम्मान्याम् ।
यत्पादपङ्कजलाक्षा मुररिपुपरभावबोधने दक्षा ॥

पात्रयतु निजक्रियायाः सूत्रवतीपतिरनन्यशरणं माम् ।
वेत्रवति यत्र निजरिपुजेतृभरंन्यस्य विहरते देवः ॥

End :

निरुपमगुणश्रेणी वाणी यदयिमुखाम्बुजे
निखिलजगतीरक्षादीक्षा यदयिदृगम्बुजे ।
निरुपम . . . . . सारास्सारा यदीयहृदम्बुजे
स दिशतु ममाचार्यो धुर्यां धियं स्वहृदम्बुजे ॥
. . . . . न्धनाचार्यप्रवररचितान् बृंहितगुणान्
प्रगल्भन्ते बोद्धुं प्रथित . . . .

D. No. 16566.

Pages, 19. Lines, 7 in a page. Extent, 180 Granthas.

आचार्यगुणादर्शः

ĀCĀRYAGUṆĀDARŚAḤ.

Begins on foll. 20*a* of the MS. described under D. No. 16564.

Describes the qualities of a preceptor in the light of the Viśiṣṭādvaita Vedānta. Reference is made to the ancient preceptors like Rāmānuja—Vedāntadeśika.

Incomplete and wants the beginning.

Beginning :

बिम्बानि ध्रुवकौतुकानि नियतं स्वच्छात्मदेहास्ततः
तेषां प्राकृतसङ्गलेशविरहामप्राकृतामि श्रियाम् ।
नेत्येतादृशवेदशास्त्रविहिताचारानुसारा क्रिया
नप्येवं परिवञ्चयन्ति मनसश्चित्रं प्रपञ्चानमी ॥

कृत्याकरणं कृत्याकरण साधनितामिमां मठेन्द्रोक्तिम् ।
कृत्याकृत्यविवेकविहीना परिविश्वसन्ति पशुकल्पानि ॥

अनुदिनमृष्टान्नादी न मांसलमेदोऽस्थिरुधिरभस्त्रीषु ।
अङ्गेषु माऽ पा नामहह विमुह्यन्ति केचन भ्रान्ताः ॥

End :

वेदान्ताचार्यपादाम्बुजमधुलहरीचञ्चरीकान् यतीन्द्रान्
प्राप्तं सत्संप्रदायं प्रथितसुचरितात् ब्रह्मतन्त्रस्वतन्त्रात् ।
यस्य श्रीवत्सवंश्यः वरदगुरुरभूत्संप्रदायोपदेष्टा
पूर्वं तत्तादृशाऽशिठमथनगुरुः संयमीन्द्रो रराज ॥

तदधीतभाष्यविविधार्थवादिनः
तदधीतवान् वरदविष्णुदेशिकात् ।

तदा नृसिंहगुरवे महादयाधिपतिस्ततस्तदभजत् पराङ्कुशः ।

तत्तादृक्कूछठकोपदेशिकयतिक्षोणीन्द्रचूडामणिः
भूतश्रीचरणारविन्दवरदाचार्यादिभिर्वंशजैः ।

आर्यैः पूर्वमुदाहृतैः प्रकटितान् मन्त्रार्थसारान् गुरुः
वात्स्यः श्रीवरदः पराङ्कुशयतीन्द्रायार्पयामास सः ॥

* * *

एतादृशस्तादृशदेशिकेन्द्र—
कटाक्षपात्रं कथमाविरासुः ।
यदन्यथा तेषु जनेषु भूयात्
कथं तदध्यात्मयुगप्रतिष्ठा ॥

D. No. 16567.

Palm-leaf. 14 × 1½ inches. Pages, 2. Lines, 9 on a page. Grantha. Slightly injured. Extent, 12 Granthas.

सेतुस्नानविधिः

SETUSNĀNAVIDHIḤ.

Begins on foll. 1*a*. The other works herein are :—Tryambakakalpa 1*b*. Prājāpatyādikṛcchravidhih 2*a*. Daśadānamantraḥ 3*a*. Jayantikalpaḥ 6*a*. Māghasnānavidhiḥ 8*a*. Putrakāmeṣṭividhiḥ 10*b*. Punarupanayana-vidhih 11 (a) Kūrmadarśana Śāntiḥ 13 (b) Sarvaprāyaśchittam 15 (a) Jaḍādyu panayanam 20*b*. Samprokṣaṇavidhiḥ 21*b*. Prāyaścittadakṣinādi-vidhiḥ 23*b*. Vedapārāyaṇavidhiḥ 24*a*. Valmikaśāntiḥ 25*a*. Kuhūśāntiḥ 26*a*. Rogaśāntiḥ 27*b*. Narapatanaśāntiḥ 27*b*. Gṛdhrādiśāntiḥ 28*b*. Masūri kādiśāntiḥ 29*b*. Gomukhaśāntiḥ 30*a*. Vināyakavratakalpaḥ 31*b*. Sarasvatīkalpaḥ 33*b*. Vighneśvarapūjāvidhānam 31*b*. Durmṛtaprā yaścittanārāyaṇabalih 35*b*. Viṣṇupratiṣṭhākalpaḥ. 39*a*. Rudrapratiṣ ṭhākalpaḥ 41*b*. Viṣṇupūjāvidhiḥ 45*a*. Mahādevapūjāvidhiḥ 46*a*. Nigalabandhavimocanaślokāḥ 47*b*. Rudrādhyāyavidhiḥ 47*b*. Mṛtyuñ jayatryambakamahāmantraḥ 50*a*. Rudrasnapanavidhiḥ 50*a*. Viṣṇu punaḥpratiṣṭhāvidhiḥ 50*a*. Viṣṇusamprokṣaṇavidhiḥ 51*b*. Gaurī pratiṣṭhā 53*a*. Vināyakasubrahmaṇyapratiṣṭhā 53*b*. Śrībhūmi-pratiṣṭhā 54*a*. Kūpataṭākārāmādipratiṣṭhā 54*b*. Ravikalpaḥ 56*a*. Śanaiścaraśāntiḥ 56*b*. Dussvapnaśāntiḥ 57*b*. Nārāyaṇabalih 58*a* Rāmapratiṣṭhāvidhih 59*a*. Gaṇḍāntaśāntih 61*b*. Yatisamskāraprayoga 62*b*. Guruśānti 66*b*. Kākamaithunadarśanaśāntiḥ 67*a*. Sinīvāli-śāntiḥ 67*b*. Narapatanaśāntiḥ 69*a*. Āyṣyahomaḥ 69*a*. Sarvāriṣṭ śāntiḥ 69*b*. Candrasūryagrahaṇaśāntiḥ 70*a*. Aśvatthopanayananavidhi 71*a*. Saṅkramaśāntiḥ 71*b*. Śanaiścaraśāntiḥ 72*b*. Ekanakṣatraśāntih 73*a*. Varuṇajapaḥ 74*a*. Śrīrāmanavamīkalpah 74*b*. Gaulīpatanaśānti 77*b*. Grahakūṭaśānti 78*a*. Arkavṛkṣahtaśānti 78*b*. Vāyaśaśānti 79*a* Dānarūpaprāyaścittam 80*b*. Arkavivāhavidhiḥ 81*a*. Parjanyaśāntiḥ

81*b*. Muṇḍajanmarkṣsaśāntiḥ 82*b*. Utpātaśāntiḥ 83*a*. Vāstuśāntiḥ 84*a*. Abhicārakahomavidhih 85*a*. Śivarātrivratakalpaḥ 85*a*. Kramukakadalyādiśāntih 88*a*. Yamunāpūjā 89*a*. Anantavratapūjāvidhānam 90*b*. Jvarastotram 94*b*. Nāgapratiṣṭhā 95*b*. Agnivibhāgaḥ 99*a*. Jvaramocanavidhiḥ 99*a*. Dhanvantarimantra 101*a*. Kṛkalāsaśāntiḥ 103*a*. Jyeṣṭhānakṣatraśāntiḥ 106*a*.

Deals with the details regarding the sea-bath at Dhanuṣkoṭi.

Wants the beginning, otherwise complete.

Beginning :

देवीपट्टणमार्गे व्रजन्तो नवपाषाणमध्ये समुद्रस्नानं कृत्वा . . . . र्थस्नानं कुर्युः । दर्भशयनमार्गस्थाः समुद्रे स्नानं कृत्वा चक्रतीर्थे स्नानं कुर्युः । अथ तर्पणक्रमः—

पिप्पलादं कार्वि कण्वं कृतान्तं जीवितेश्वरम् ।
मन्युं च कालरात्रिं च विद्यां चाहर्गणेश्वरम् ॥
वसिष्ठं वामदेवं च पराशरमुमापतिम् ।
वाल्मीकिं नारदं चैव वालखिल्यमुनिं तथा ॥
नलं नीलं गवाक्षं च गवयं गन्धमादनम् ।
मैन्दं च द्विविदं चैव शरभं वृषभं तथा ।

* * * *

रामं च लक्ष्मणं सीतां महाभागां यशस्विनीम् ।
तर्पणं च चतुस्त्रिंशत्सेतौ कुर्याद्विचक्षणः ॥

End :

अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥

Colophon :

॥ इति समुद्रस्नानविधिः ॥

D. No. 16568.

Page, 1. Lines, 9 on a page. Extent, 5 Granthas.

त्र्यम्बककल्पः

TRYAMBAKAKALPAḤ.

Begins on foll. 1*b* of the MS. described under Previous D. No. 16567 Deals with the details of repeating the Tryambakamantra.

Complete.

Beginning :

त्र्यम्बकस्य मन्त्रस्य शान्तिं वक्ष्याम्यतः परम् ।
प्रसन्नो ब्राह्मणः कुर्यात्पुनश्चरणमादितः ॥
पश्चिमद्वारमासाद्य शम्भोरायतनं महत् ।
तस्य पूर्वोत्तरे कृत्वा होमकुण्डं समेखलम् ॥
मार्थत्वा चाग्निमादाय मुखान्तं होममाचरेत् ।
त्र्यम्बकेन जुहुयाद्धविरष्टसहस्रकम् ॥

End :

महादेवं समाराध्य . . . .
. . . . शम्भोस्तस्य प्रसादकम् ॥

D. No. 16569.

Pages, 3. Lines, 7 in a page. Extent, 25 Granthas.

प्राजापत्यादिकृच्छ्रविधिः
PRĀJĀPATYĀDIKṚCCHRA VIDHIḤ.

Begins on foll. 2*a* of the MS. described under D. No. 16567.

Deals with the details of performing religious penance like Prājāpatya and others.

Complete.

Beginning :

हं वा . . भुक्तिस्त्र्यहं . . . . . . ।
अयाचितं च त्रियहं त्रिदिनन्त्वन्नवर्जितम् ॥
प्राजापत्याभिधं कृच्छ्रमेवंरुपं सदेवलः ।
अथातिकृच्छ्रम् . . . . ॥
एकैकग्रासमात्रस्य भोजनन्तु त्र्यहं दिवा ।
नक्तं , . . त्र्यहमुक्तं वै त्रियहं तदयाचितम् ॥
उपोषणं च त्रिदिनमतिकृच्छ्रं प्रकीर्तितम् ॥

End :

. . . . क्ष्य यत्नतः
प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ।

Colophon :

इति प्राजापत्यादिकृच्छ्रनिर्णयः ।

* * * *

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
तत्संसर्गं तथा कृत्वा समं चैवातितिष्ठकम् ॥
षडब्देनैव शुद्ध्येत मनुष्यो वीतमत्सरः ।

D. No. 16570.

Pages, 6. Lines, 7 in a page. Extent, 35 Granthas.

दशदानमन्त्रः

DAŚADĀNAMANTRAḤ.

Begins on foll. 3*a* of the MS. described under D. No. 16567.

This contains the hymns to be recited which make ten kinds of gifts.

Complete.

Beginning :

कांस्यदानमन्त्रः—

कांस्यं रुद्रसमुद्भूतं सर्वदेवमयं च यत् ।
कांस्यदानेन महता मम पापं व्यपोहतु ॥

अथ कलशदानम्—

कलशो ब्रह्मदैवत्यः कलशे विष्णुरास्थितः ।
कलशः शङ्करः साक्षादतः शान्तिं प्रयच्छमे ॥

* * * *

स्मृत्यादिपरिमाणमाह—मत्स्यः—

दशहस्तेन दण्डेन त्रिंशद्दण्डविवर्धनम् ।
त्रिभागहीनं गोचर्मदानमाह प्रजापतिः ॥

अशक्तस्तु यथाशक्ति भूमिं दद्याद्विचक्षणः ।
अल्पूनमानपात्रेन द्रोणत्रयमितास्तिलाः ॥

End :

उत्तानस्त्वाङ्गिरसः प्रतिगृह्णातु इत्यन्तमुक्त्वा अनेन लवणदानेन यजमानस्य यथाशास्त्रफलसिद्धिरस्त्विति वदेत् । एवं कर्तुमशक्तश्चेत्तत्तद्द्रव्याभावे सर्वं हिरण्यरूपेण वा दद्यात् ।

Colophon :

। इति दशदानविधिः ।

After end few lines in Puruṣasūktakalpa.

D. No. 16571.

Pages, 5. Lines, 8 in a page. Extent, 108 Granthas.

जयन्तीकल्पः

JAYANTĪKALPAḤ.

Begins on foll. 6*a* of the MS. described under D. No. 16567.

Similar to the work described under D. No. 8266 with different readings.

Complete.

Beginning :

अद्यस्थित्वा निराहारो श्वोभूते पुरुषोत्तम ।
भोक्ष्यामि देवकीपुत्र अस्मिन्जन्माष्टमीव्रते ॥

इति संकल्प्य सिंहार्के जयन्तीं कुर्यात् न भवीति (?) वचनान्नतु कर्कटेऽर्के ।

अथ ध्यानम्—

कृष्णं च बलभद्रं च वासुदेवं च देवकीम् ।
नन्दगोपकुमारं च सुभद्रां रोहिणीं तथा ॥

End :

अथ चन्द्रनमस्कारः—

ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते ।
नमस्ते रोहिणीकान्त सुधाकुम्भ नमोऽस्तु ते ॥

अथ चन्द्रार्घ्यम्—

क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
पीयूषधामन् रोहिण्या सहितोऽर्घ्यं गृहाण मे ॥

Colophon :

। इति जयन्तीकल्पः समाप्तः ।

D. No. 16572.

Pages, 4. Lines, 8 in a page. Extent, 17 Granthas.

माघस्नानविधिः

MĀGHASNĀNAVIDHIḤ.

Begins on foll. 8*a* of the MS. described under No. 16567.

Deals with the details of the bath on the fullmoon day in the month of Māgha. In addition to this, this work contains hymns to be recited while taking the bath on the Rathasaptamī day and while lighting the lamps on the Krittikā day.

Complete.

Beginning :

माघस्नानविधिः—

माघमासे रटन्त्यापः किञ्चिदभ्युदिते रवौ ।
ब्रह्मघ्नं वा सुरापं वा कं पतन्तं पुनात्यहो ॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव यथोक्तफलदो भव ॥

End :

रथसप्तमीस्नानमन्त्रः—

सप्तसाप्तिप्रिये देवि सप्तलोकप्रदीपिके ।
सप्तजन्मार्जितं पापं हर सप्तमि सत्वरम् ॥

* * * *

कृत्तिकादीपदानमन्त्रः—

उत्सवं तव दीपस्य मया दत्तं महाबले ।
वत्सरस्य सकृत्पश्य गृहाण दितिनन्दन ॥

D. No. 16573.

Pages, 2. Lines, 8 in a page. Extent, 12 Granthas.

पुत्रकामेष्टिविधिः

PUTRAKĀMEṢṬIVIDHIḤ.

Begins on foll. 10*b* of the MS. described under D. No. 16567.

Deals with the details regarding the sacrificial ceremony to be performed by the childless in order to get children.

Complete.

Beginning

अथापमृत्युहोमं व्याख्यास्यामो जन्मत्रये यदि पुण्यक्षेत्रे वा तावेवेश ब्राह्मणान्भोजयित्वाशिषो वाचयित्वाथ देवयजनोल्लेखनप्रभृत्याग्निमुखान्तं कृत्वा पक्वान्जुहोति । भूर्भुवः सुवरोमिति पुरोनुवाक्यामनूच्य, तत्सवितुर्वरेण्यमिति याज्यया जुहोति ।

End :

मनसा चतुर्होतारमनुस्मृत्योमिति ब्रुवन् ।
उपगम्य ततः पत्नीं व्यवेयाच्च यथाविधि ॥
एवमुत्पादिताः पुत्रा न लुप्यन्ते कदाचन ।
एवं पुत्रकामेष्टिं यजमानः स्वयमेव कुर्यात् ।

सोमो धेनुं राहुगणो गौतमसामात्रिष्टुभू सशेषजपः स कालसंहितायां ज्ञातव्यम्

Colophon :

। इति पुत्रकामेष्टिविधिः समाप्तः ।

D. No. 16574.

Pages, 4. Lines, 8 in a page. Extent, 26 Granthas.

पुनरुपनयनविधिः

PUNARUPANAYANAVIDHIḤ.

Begins on foll. 11*a* of the MS. described under D. No. 16567.

Deals with the details regarding the performance of re-upanayanam ceremony.

Complete.

Beginning :

नृसिंहपुराणे लिङ्गपुराणेः—
पुनरुपनयनं कुर्यात्सर्वपापनिवृत्तये ।
अभ्यज्य दम्पती स्नात्वा प्रातः काले यथाविधि ॥
पुण्याहवाचनं कुर्यान्नान्द्याह्वानान्ततः परम् ।
पूतेन मनसा राजन्द्रव्यलोभपराङ्मुखः ॥
स्वगृहे रहसि स्थाने पाषण्डजनवर्जिते ।
आचार्यं वरयेत्प्राज्ञमन्यगोत्रं कुटुम्बिनम् ॥

End :

कलौ युगे विशेषेण प्रायश्चित्तं विशुद्धिदम् ।
प्रायश्चित्तेन पूतात्मा तरेल्लोकत्रयं मुदा ॥
आचार्यं त्रिः परिक्रम्य प्रणिपत्य क्षमापयेत् ।
दद्याद्द्रव्याणि सर्वाणि आचार्याय विशुद्धये ॥

D. No. 16575.

Pages, 4. Lines, 8 in a page. Extent, 38 Granthas.

कूर्मदर्शनशान्तिः

KŪRMADARŚANAŚĀNTIḤ.

Begins on foll. 13*b* of the MS. described under D. No. 16567.

Same work as that described under D. No. 3592.

Complete.

D. No. 16576.

Pages, 12. Lines, 8 in a page. Extent, 110 Granthas.

सर्वप्रायश्चितम्

SARVAPRĀYAŚCITTAM.

Begins on foll. 15*a* of the MS. described under D. No. 16567.

Gives details regarding the performance of various kinds of expiratory ceremony.

Similar to the work that described under D. No. 3508.

Complete.

Beginning

तत्र परिषदं त्रिः प्रदक्षिणीकृत्य नमो महद्भ्यो नमः सदस इति मन्त्रेण साष्टाङ्गं प्रणमेत् । अथ परिषद्वाक्यम्

किं ते कार्यं किमर्थं वास्मान्मृगयसे द्विज ।
अत्र नो ब्रूहि सत्येन सत्यं हि विदुरात्मनः ॥

* * * *

अथ यजमानवाक्यम्—

अशेषे हे परिषत् । भवत्पादमूले मया समर्पितां परिषद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य मदीयां विज्ञापनामवधर ।

End :

एवं कृते शुद्धः पूतः कर्मण्यो भविष्यति । ततः कर्ता मनसि शुद्ध एवाहमिति भावयन्पापं न स्मरेत् । एवं स्त्रीशूद्रादीनां वेदमन्त्रहोम-वर्जं कारयेत् ।

Colophon :

। इति सर्वप्रायश्चित्तविधिः ।

D. No. 16577.

Pages, 3. Lines, 8 in a page. Extent, 162 Granthas.

जडाद्युपनयनम्

JAḌĀDYUPANAYANAM.

Begins on foll. 20*b* of the MS. described under D. No. 16567.

Same work as that described under No. 3622.

Complete.

D. No. 16578.

Pages, 4. Lines, 8 in a page. Extent, 30 Granthas.

सम्प्रोक्षणविधिः

SAMPROKṢAṆAVIDHIḤ.

Begins on foll. 21*b* of the MS. described under D. No. 16567.

Gives details regarding the consecration ceremony of a deity. The views of Bodhāyana are cited here.

Complete.

Beginning :

संप्रोक्षणविधिं वक्ष्ये गृहार्चनविधौ हरेः ।
पूर्वस्थापितबिम्बस्य न पुनः स्थापनं स्मृतम् ।
स्थापने तु महादोषस्तस्मा त्संप्रोक्षणं स्मृतम् ।
अङ्गभङ्गादिसन्धाने प्रतिष्ठां च समाचरेत् ॥

End :

कलशमादाय चतुष्पथं गत्वा सिंहे इत्यनुवाकं जपित्वात्मानं कलशेऽवेक्ष्य पृष्ठतो निरस्याप उपस्पृश्य गृहं गत्वाभ्युदयपुण्याहं कृत्वा ब्रह्मणे वरं दत्वा एवं सवनत्रयं सप्ताहं त्र्यहमेकाहं वा कुर्यात् । ब्राह्मणान्भोजयेदित्याह भगवान्बोधायनः ।

D. No. 16579.

Pages, 2. Lines, 8 in a page. Extent, 16 Granthas.

प्रायश्चित्तदक्षिणादिविधिः

PRĀYAŚCITTADAKṢIṆĀDĪVIDHIḤ.

Begins on foll. 23*b* of the MS. described under D. No. 16567.

Deals with details of gifts to be given while expiratory ceremonies are performed.

Complete.

Beginning :

प्रायश्चित्तविधानाय यद्वित्तं परिकल्पितम्।
तदर्धार्धं वक्तुरेव स्यादुपदेष्टुस्तदर्धकम् ॥
वक्ता विधायकः उपदेष्टा विधायकः ।

परिषल्लक्षणम्—

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
सहस्रशः समेतानां परिषत्वं न विद्यते ॥

End :

वृद्धत्वे यौवने बाल्ये यः कृतः पापसञ्चयः ।
पूर्वजन्मसु वा ज्ञानात्तस्मादपि विमुच्यते ॥
स्नेहाद्वा यदि वा मोहाद्भयादज्ञानतोऽपि वा ।
कुर्वन्त्यनुग्रहं येतु तत्पापं तेषु गच्छति ॥
पादः परिषदं गच्छेत्पादो गच्छेद्विधायकम् ।
पादोऽनुवादकं गच्छेत्पादः कालेन पच्यते ॥

D. No. 16580.

Pages, 3. Lines, 8 in a page. Extent, 27 Granthas.

वेदपारायणविधिः

VEDAPĀRĀYAṆAVIDHIḤ.

Begins on foll. 24*a* of the MS. described under D. No. 16567.
Gives details regarding the recitation of the Vedas.
Complete.

Beginning :

अथातः सर्ववेदपारायणविधिं व्याख्यास्यामः । आसमाप्तेर्नाश्नीयात् यद्यशक्तः स्यात्तस्यापः पयः फलान्योदनं वा हविष्यमन्नमल्पं भुक्त्वा तदैव शेषं समापयेत् । वेदपारायणं करिष्य इति संकल्प्य प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य

End :

प्राणानायम्य प्रणवं त्रिरुक्त्वा विरमेत् ।
समाप्य ब्राह्मणान्भोजयेदित्याह भगवान्बोधायनः ।

D. No. 16581.

Pages, 3. Lines, 8 in a page. Extent, 20 Granthas.

वल्मीकशान्तिः

VALMĪKAŚĀNTIḤ.

Begins on foll. 25*a* of the MS. described under D. No. 16567.

Similar to the work described under D. No. 3410 according to Bṛhaspati.

Complete.

Beginning :

अतः परं प्रवक्ष्यामि वल्मीकोद्भवशान्तिकम् ।
तद्दोषशमनार्थाय तमुवाच बृहस्पतिः ॥
वल्मीकस्य समीपे तु शान्तिं कुर्याद्विचक्षणः ।
गोमयेनोपलिप्योर्वीं चतुरस्रसमन्वितम् ॥

End :

आचार्याय यथा दद्यादृत्विजे च यथाविधि ।
ब्राह्मणान्भोजयेत्पश्चाद्बन्धुभिः सह भोजयेत् ॥
एवं कृते तु राजेन्द्र यथोक्तफलभाग्भवेत् ।
एषां शान्तिस्तु कर्तव्या दोषमाशु व्यपोहति ॥

Colophon :

। इति मानव्यशास्त्रे बृहस्पतिवाक्ये वल्मीकशान्तिः समाप्ता ।

D. No. 16582.

Pages, 4. Lines, 8 in a page. Extent, 25 Granthas.

कुहूशान्तिः

KUHŪŚĀNTIḤ.

Begins on foll. 26*a* of the MS. described under D. No. 16567.

Similar to the work described under No. 3272 but with different reading.

Complete.

Beginning :

कुहूशान्तिं व्याख्यास्यामो यस्य जन्मनक्षत्रे जन्मलग्ने चन्द्रलग्ने वा विषनाड्या कुहूर्व्रजेत्तस्य शान्तिं कुर्वीत । शुचौ देशे समे गोमयेन गोचर्ममात्रं चतुरस्रस्थण्डिलं कृत्वा

End :

आचार्याय सुवर्णवस्त्रादिभिः परितोषयेदृत्विग्भ्यो दक्षिणां दद्याद्ब्राह्मणान्भोजयेदित्याह भगवान्बोधायनः । पञ्चत्वक् पञ्चपल्लवन्यग्रोधे . . . चूतसवल्कलाः । पालाशाश्वत्थ कपित्थ बिल्वेन्दुरपल्लवाः ।

एतान्कुम्भेषु . . . . सर्वकर्मसु शान्तिषु ।

D. No. 16583.

Page, 1. Lines, 8 in a page. Extent, 19 Granthas.

रोगशान्तिः

ROGAŚĀNTIḤ.

Begins on foll. 27*b* of the MS. described under D. No. 16567.

Similar to the work described under D. No. 3459.

Complete.

Beginning :

अथाहं सर्वरोगाणां शान्तिं वक्ष्यामि शौनक ।
पौर्णमास्याममावास्यां कुर्यादेतान्त्रिजन्मसु ॥
स्वगृह्योक्तविधानेन आज्यभागान्तमाचरेत् ।

End :

सौविष्टकृतमारभ्य होमशेषं समापयेत् ।
ब्राह्मणांश्च यथाशक्ति भोजयेत्स्वस्ति वाचयेत् ॥

Colophon :

। इति रोगशान्तिः समाप्ता ।

D. No. 16584.

Pages, 3. Lines, 8 in a page. Extent, 15 Granthas.

नरपतनशान्तिः

NARAPATANAŚĀNTIḤ.

Begins on foll. 27*b* of the MS. described under D. No. 16567.

Similar to the work that described under D. No. 3349.

Complete.

Beginning :

बृहस्पतिः

निद्रावशो मनुष्यस्तु मानुषोपरि चापतेत् ।
सा तेन मरणं तस्य षण्मासादथवा मृतिः ॥

तदा तद्दोषनाशाय शान्तिं कुर्याद्विचक्षणः ।
नद्यां वा देवखाते वा सचेलः स्नानमाचरेत् ॥

End :

दशदानादिकं कुर्यादाचार्याय विशेषतः ।
ऋत्विग्भ्यो दक्षिणां दद्याद्ब्राह्मणान्भोजयेत्ततः ॥

एवं कृते स निर्दोषो भवतीति बृहस्पतिः ॥

Colophon :

। इत्युत्पलपरिमले नरपतनशान्तिः समाप्ता ।

D. No. 16585.

Pages, 3. Lines, 8 in a page. Extent, 10 Granthas.

गृध्रादिशान्तिः

GṚDHRĀDIŚĀNTIḤ.

Begins on foll. 28*b* of the MS. described under D. No. 16567.

On the ceremonies toward off the evil consequences due to the sitting on entrance (into) the house by a vulture.

Complete.

Beginning :

अथातः सम्प्रवक्ष्यामि गृध्रशान्तीर्महामुने ।
गृध्रः श्येन उलूकश्च श्वेतकाकः कपोतकः ॥

अन्तर्गृहे मुने यस्तु विशत्युपरि वा यदा ।
यमदूत इति प्रोक्तास्तत्र उत्पातकारणम् ॥

End :

तिलकूश्माण्डदानं च आज्यस्यैवावलोकनम् ।
विप्रेभ्यो भोजनं दद्यादष्टौ वा द्वादशं तुवा ।
इत्येवं दोषशान्तिर्वै निर्दोषाय भवेत्तु सः ।

Colophon :

। इति गृध्रशान्तिः समाप्तः ।

D. No. 16586.

Pages, 2. Lines, 8 in a page. Extent, 17 Granthas.

मसूरिकाशान्तिः

MASŪRIKĀŚĀNTIḤ.

Begins on foll. 29*b* of the MS. described under D. No. 16567. On the ceremonies to be performed to ward off small pox. Complete.

Beginning :

आदित्यवारे हस्तेवा द्वादश्यां वा शुभे दिने ।
कुर्यान्मसूरिकाशान्ति मामध्याहात्प्रशस्यते ॥
सङ्कल्पपूर्वं पुण्याहं वाचयेद्ब्राह्मणैः सह ।
स्वगृह्योक्तविधानेन आज्यभागान्तमाचरेत् ॥
अग्नेः पुरस्ताद्धान्ये तु कुम्भं संस्थापयेद्बुधः ।
सौवर्णं राजतं कम्भं शुभं ताम्रमयं तु वा ॥

End :

पनसाम्रफलैश्चैव नालिकेरफलैस्तथा ।
कदल्या च दधिक्षीरैश्चन्दनोदकसंयुतैः ॥
शिवाभिषेकं कुरुते सर्वशान्तिर्मसूरिका ।
ब्राह्मणान्भोजयेत्पश्चात्सद्यः शान्तिप्रदो भवेत् ॥

Colophon :

। इति गायत्रीकल्पप्रकारेण
मसूरिकाशान्तिः समाप्ता ।

D. No. 16587.

Pages, 5. Lines, 9 in a page. Extent, 53 Granthas.

विघ्नेश्वरपूजाविधानम्

VIGHNEŚVARAPUJĀVIDHĀNAM.

Begins on foll. 31*b* of the MS. described under No. 16567.

Same work as that described under No. 8691.

Complete.

D. No. 16588.

Pages, 5. Lines, 9 in a page. Extent, 38 Granthas.

सरस्वतीकल्पः

SARASVATĪKALPAḤ.

Begins on foll. 33*b* of the MS. described under D. No. 16567.

Same work as that described under D. No. 8562.

Complete.

D. No. 16589.

Pages, 5. Lines, 9 in a page. Extent, 100 Granthas.

दुर्मृतप्रायश्चित्तनारायणबलिः

DURMṚTAPRĀYAŚCITTANĀRĀYAṆABALIḤ.

Begins on foll. 35*b* of the MS. described under D. No. 16567.

Deals with a special kind of obsequial ceremony called Nārāyaṇabali to be performed in the case of persons who meet with unnatural death.

Complete.

Beginning :

अथ बुद्धिपूर्वेणात्महन्तृविषये प्रायश्चित्तमुच्यते—द्वादशाब्दात्परं पुनःसंस्कारादिकं करिष्ये इति चेत्तदा प्रायश्चित्तं विना नारायणबलिपूर्वकं दाहादिकं यथावत्कर्तव्यम् । त्रिवर्षादूर्ध्वं कुरुते यदि ब्रह्मसमूहे यत्किञ्चिद्दक्षिणां दत्वा तेषामनुज्ञया नारायणबलिपूर्वकं दाहादिकं कर्तव्यम् ।

* * * *

जलादिमरणप्रायश्चित्तं वक्ष्यमाणप्रकारेण कृत्वा तदानीं देहसंस्कारं कुर्यात् । अथ बुद्धिपूर्वं साहसं विना यदृच्छया जलादिमरणे तत्तत्प्रायश्चित्तहोमं कृत्वा तदानीमेव शरीरं संस्कुर्यात् ।

End :

अथ परिषेचनाद्युपस्थानान्तं कुर्यात् सर्वपापैः प्रमुच्यते इत्याह भगवान्बोधायनः। यद्वा आपूर्विकविधिना वा कर्तव्यम्। एवं कृतं चेत्सर्वान् पितॄनधिगच्छेत् ब्रह्मलोके महीयते। ब्राह्मणभोजने हुतये प्रदानमन्त्राभिमर्शनं स्वधादिकमभिश्रवणादिकं नास्ति। एवं बुद्धिपूर्वमृतस्य कुर्यात्। एवं कृत्वा पश्चादस्थ्यादिसंस्कारं कुर्यात्।

Colophon :

। दुर्मृतिमरणप्रायश्चित्तनारायणबलिः समाप्तः।

D. No. 16590.

Pages, 6. Lines, 9 in a page. Extent, 63 Granthas.

विष्णुप्रतिष्ठाकल्पः

VIṢṆUPRATIṢṬHĀKALPAḤ.

Begins on foll. 39*a* of the MS. described under D. No. 16567.

Deals with the details of the ceremony to be performed in connection with the consecration of divine images of Viṣṇu.

Complete.

Beginning :

अथातो विष्णुप्रतिष्ठाकल्पं व्याख्यास्यामः. द्वादश्यां श्रोणायां वा यानि चान्यानि शुभनक्षत्राणि तेषु पूर्वेद्युरेव युग्मान्ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वा समागतायां निशायां कपिलायां पञ्चगव्येन सहिरण्ययवदूर्वाङ्कुराश्वत्थवर्णपलाशपर्णेन सुवर्णोपधानं प्रतिकृतिं कृत्वा।

* * * *

शाकुनेन' सूक्तेन देवस्यालयं प्रवेश्य मणिमुक्ताप्रवालसुवर्णरजतानि पादपीठे निधायातो देवा अवन्तु न इति विष्णुं स्थापयेत्।

End :

जापकेभ्यो यथाशक्ति दक्षिणां दद्यात्। ब्रह्मचारी गृहस्थो वा द्वादश ब्राह्मणान् संयतान् हरिद्रौदनं भोजयेत्। सन्तिष्ठते प्रतिष्ठाविधिरित्याह भगवान्बोधायनः।

Colophon :

। इति विष्णुप्रतिष्ठा समाप्ता।

D. No. 16591.

Pages, 6. Lines, 9 in a page. Extent, 68 Granthas.

रुद्रप्रतिष्ठाकल्पः

RUDRAPRATIṢṬHĀKALPAḤ.

Begins on foll. 41*b* of the MS. described under D. No. 16567.

Deals with the details of the ceremony to be performed in connection with the consecration of the divine image of Śiva.

Complete.

Beginning :

अथातो रुद्रप्रतिष्ठाकल्पं व्याख्यास्यामः । चतुर्थ्यामष्टम्यामार्द्रायामपभरण्यां वा यानि चान्यानि शुभनक्षत्राणि तेषु पूर्वेद्युरेव युग्मान्ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वा समागतायां निशायां . . . . पञ्चगव्येन सहिरण्येन दूर्वाङ्कुराश्वत्थपर्णपलाशपर्णेन सुवर्णोपधानं प्रतिकृतिं कृत्वा

* * * *

हिरण्यवर्णा इति पूर्वोक्तेन हिरण्येन तेजसा चक्षुर्विमोचयेत् तेजोऽसीति लिङ्गे निवर्तन्ते । चक्षुषोरभावदथगन्ध . . . संयुक्ते पुष्पवस्त्रैरलङ्कृते रत्नाम्बुकलशे व्याहृतीभिः व्यस्तैः समस्तैरादित्यमण्डलात् पुरु . . . . आवाह्य ।

End :

यथाशक्ति दक्षिणां जापकेभ्य इति ब्रह्मचारी गृहस्थोवा द्वादश ब्राह्मणान् वृत्तसम्पन्नान् हरिद्रौदनं भोजयेत् । सन्तिष्ठते प्रतिष्ठाविधिरित्याह भगवान्बोधायनः ।

Colophon :

। इति रुद्रप्रतिष्ठाविधिः समाप्तः ।

The Scribe adds :

। अय्य वेङ्कटेश्वरेण लिखितोऽयं प्रतिष्ठाविधि

D. No. 16592.

pages, 3. Lines, 9 in a page. Extent, 20 Granthas.

विष्णुपूजाविधिः

VIṢṆUPŪJĀVIDHIḤ.

Begins on foll. 45a of the MS. described under D. No. 16567.
Similar to the work described under D. No. 8697.
Complete.

Beginning :

अथ महापुरुषस्याहरहः परिचर्याविधिं व्याख्यास्यामः । शुचौ समे देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाक्षतपुष्पैः यथालाभमर्चयित्वा सह पुष्पोदकेन भगवन्तमावाहयेत् ।

ओं भूः पुरुषमावाहयाम्यों भुवः पुरुषमावाहयाम्यों सुवः पुरुषमावाहयाम्यों भूर्भुवःसुवःपुरुषमावाहयाम्ययातु भगवान् महापुरुष इति कुशैरासनं दद्यात् ।

End :

ओं भूर्भुवःसुवः पुरुषमुद्वासयामि । प्रयातु भगवान्महापुरुष इति प्रतिमास्थाने आवाहनोद्वासनवर्जमहरहः स्वस्त्ययनमित्याचक्षत इत्याह भगवान्बोधायनः ।

Colophon :

। इति विष्णुपूजाविधिः समाप्तः ।

D. No. 16593.

Pages, 4. Lines, 9 in a page. Extent, 38 Granthas.

महादेवपूजाविधिः

MAHĀDEVAPŪJĀVIDHIḤ.

Begins on foll. 46a of the MS. described under D. No. 16567.
Deals with the details concerned with the worship of Lord Śiva.
Complete.

Beginning :

अथातो महादेवस्याहरहः परिचर्याविधिं व्याख्यास्यामः । शुचौ समे देशे गोमयेन गोचर्ममात्रमुपालिप्य प्रतिकृतिं कृत्वा अक्षतपुष्पैर्यथालाभमर्चयित्वा सह पुष्पोदकेन महादेवमावाहयेत् ।

End :

ओं भूर्महादेवमुद्वासयाम्योंभुवर्महादेवमुद्वासयाम्येंसुवर्महादेवमुद्वासयाम्यों-भूर्भुवःसुवर्महादेवमुद्वासयामि । प्रयातु भगवान्महादेव इति विसर्जयति । लिङ्गस्थानेष्वावाहनोद्वासनवर्जमहरहः स्वस्त्ययनमित्याचक्षत इत्याह भगवान्-बोधायनः ।

Colophon

। इति महादेवपूजाविधिः समाप्तः ।

D. No. 16594.

Page 1. Lines, 9 in a page. Extent, 42 Granthas.

निगलबन्धविमोचनश्लोकाः

NIGAḶABANDHAVIMOCANAŚLOKĀH.

Begins on foll. 47*b* of the MS. described under D. No. 16567.

These stanzas are addressed to Lord Śiva and the repetition of these which are three in number is supposed to release one from fetters and prison.

Complete.

Beginning :

उत्तप्तहेमरुचिरे त्रिपुरे पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगलबन्धनयन्त्रितस्य
त्वत्संस्मृतौ झटिति मे निगला गलन्ति ॥

End :

वामैन्दवीमिव कलामनुफालदेश
मुद्भासिताम्बरधरामवलोकयन्तः ।
सद्यो भवन्ति सुधियः कवयो भवन्ति
त्वद्भावनायकधियामसि कामधेनुः ॥

இந்த மந்த்ரத்ரயத்தை தக்ஷிணாமூர்த்தி ஸந்நிதியிலே இருந்து ஜபித்தாலுகில் நிகளபந்தன காராக்ருஹ மோசனமாம்.

D. No. 16595.

Page, 6. Lines, 9 in page. Extent, 58 Granthas.

रुद्राध्यायविधिः

RUDRĀDHYĀYAVIDHIH.

Begins on foll. 47*b* of the MS. described under D. No. 16567.

This deals with the details to be observed while reciting the Rudrapraśna.

Complete.

Beginning :

अतः परं प्रवक्ष्यामि रुद्राध्यायविधिं परम् ।
शुभवारे शुभर्क्षे च आनुकूल्यशुभे दिने ॥
आहूय ब्राह्मणान् रुद्रसंख्याकान् वेदवित्तमान् ।
श्रोत्रियं च सुशीलं च कुटुम्बिन मरोगिणम् ॥
वेदाध्ययनसम्पन्नमाचार्यं वरयेद्बुधः ।
नद्यां समुद्रगामिन्यां तीर्थे वा देवखातके ॥
आचार्य ऋत्विजोपेतः स्नानं कृत्वा यथाविधि ।

End :

यज्ञास्तपश्च दानानि तीर्थानि विविधानि च ।
एतानि रुद्रजापस्य कलां नार्हन्ति षोडशीम् ॥
स्वरमात्राविहीनं तु पदाकारविवर्जितम् ॥
प्रयत्नेन सदा जापं रुद्रानावृत्य धर्मवित् ॥

Colophon :

। इत्येकादशरुद्रजपविधिः समाप्तः ।

D. No. 16596.

Pages, 6. Lines, 9 in a page.

मृत्युञ्जयत्र्यम्बकमहामन्त्रः

MṚTYUÑJAYATRYAMBAKAMAHĀMANTRAḤ.

Begins on foll. 50*a* of the MS. described under D. No. 16567.

Same work as that described under D. No. 6358 but different end.

Complete.

End :

प्रणवेन पुष्पफलाक्षतामिश्रजलेन तत्कालसम्पाद्येनाभिषिञ्चति व्याहृतीभिः परं ब्रह्मेति विज्ञायते । पाद्याचमनीया . . . . . सम्पादितानि दत्वा शेषं च नित्यार्चनवत् । अथ गुलोदनपायसेनान्नेन निवेदयेत् । यद्वा स्वगायत्र्या सर्वमाचरेत् । आचार्यमृत्विजश्च संपूज्य ब्राह्मणान्भोजयेदित्याह भगवान्बोधायनः ।

D. No. 16597.

Page, 1. Lines, 9 in a page. Extent, 9 Granthas.

रुद्रस्नपनाविधि

RUDRASNAPANAVIDHIH.

Begins on foll. 50*a* of the MS. described under D. No. 16567.

Deals with the details to be observed while bathing the idol of Lord Śiva.

Complete.

Beginning :

अथातः संप्रवक्ष्यामि देवस्य स्नपने विधिम् ।
महतो लिङ्गदेशे वा कारयेद्वेदिकां बुधः ॥
एकरात्रं द्विरात्रं वा न कुर्यादर्चनादिकम् ।
देवालयं वा शूद्राद्यैरुच्छिष्टैर्दूषितं यदि ॥

End :

देवं तैलामलकपिष्टहरिद्राभिः स्नापयित्वा सुरभि, मत्यादि . . . पवन्तैः तत्पुरुषायेति अपः पञ्चगव्येनाभिषिञ्चति सद्यो जातादिभिः कलशैश्च यथाक्रमम् ।

अथ नित्यार्चं व . . . . . शेषं कुर्याद्विशेषेण निवेदयेदाचार्य ऋत्विग्भ्यो यथाशक्ति दक्षिणां दद्यात् ।

Colophon :

। इति रुद्रस्नपनविधिः ।

D. No. 16598.

Pages, 3. Lines, 9 in a page. Extent, 45 Granthas.

विष्णुपुनःप्रतिष्ठाविधिः

VIṢṆUPUNAḤPRATIṢṬHĀVIDHIḤ.

Begins on foll. 50*a* of the MS. described under D. No. 16567.

Gives the details of the re-installation ceremony of the idol of Lord Viṣṇu.

Complete.

Beginning :

अथ विष्णोः पुनः प्रतिष्ठा—

नीचार्तवशूद्रादिभिः स्पर्शने त्रिरात्रादूर्ध्वमर्चनाविच्छेदे कर्तव्य . . . कर्मवत् सर्वं परेहनि पुण्याहान्तं कृत्वा व्रीहिभिस्तण्डुलं कृत्वा कलशान्पञ्च निक्षिपेत् । रत्ना . . . कलशं मध्ये . . . . सवस्त्रकम् ।

पञ्चगव्यं पुरो दिशि पाद्यार्घ्याचमनीयानि पात्राणि सादयेत् ।

End :

वेदादिभिः स्तुतिभिश्च स्तुत्वा द्विश्चतुर्वा . . . . . विश्वभुजे नमै इति चतुर्भिः दण्डवत् प्रणमेद्विष्णुं प्रार्थ्याचार्यादीन्सम्पूज्य ब्राह्मणान्भोजयत् ।

Colophon :

। इति विष्णुपुनः प्रतिष्ठा समाप्ता ।

D. No. 16599.

Pages, 2. Lines, 9 in a page. Extent, 12 Granthas.

विष्णुसम्प्रोक्षणविधिः

VIṢṆUSAMPROKṢAṆAVIDHIḤ.

Begins on foll. 51*b* of the MS. described under D. No. 16567.

Gives the details of the consecration ceremony of the idol of Lord Viṣṇu.

Complete.

Beginning :

अथ विष्णुसम्प्रोक्षणविधिं व्याख्यास्यामः । शुभे जन्मनक्षत्रे . . . . स्वप्ने प हाराय त्रिरात्रमर्चनविच्छेदे शूद्रादिभिर्देवालयाद्युपहते चोराद्युपहते कलहादौ च स्नपनं कुर्यात् । सङ्कल्प्याचार्यं द्वादशाद्विजांश्च वृत्वा विष्णुः प्रीयतामिति पुण्याहं व्रीहिभिः स्थण्डिलं कृत्वा

End :

पञ्चशान्ति जपित्वाभिषिञ्चेत् । शेषं नित्यार्चनवत् सर्वं कुर्यात् । आचार्यायर्त्विग्भ्यश्च दक्षिणां दद्यात् । ब्राह्मणान्भोजयेद्विष्णुसायुज्यमाप्नुयात् ।

Colophon :

। विष्णुसम्प्रोक्षणविधिः समाप्तः ।

D. No. 16600.

Pages, 2. Lines, 9 in a page. Extent, 18 Granthas.

गौरीप्रतिष्ठा

GAURĪPRATIṢṬHĀ.

Begins on foll. 53*a* of the MS. described under D. No. 16567.

On the consecration of the idol of Goddess Pārvati.

Complete.

Beginning :

अथ गौरीप्रतिष्ठा । शम्भुना सहावाहयेत् । पृथक्करणे शुक्लपक्ष-पञ्चम्यां पौर्णमास्यां वा गुरुशुक्रप्रकाशे कुर्यात् । रुद्रप्रतिमावदावाह-नान्तं सर्वं कुर्यात् । गौरी प्रीयतामिति पुण्याहमत्र रुद्रमन्त्रस्थाने कात्याय-नाय विद्महे इति दर्भा गायत्री मन्त्रः ।

End :

अथ स्विष्टकृतादि समाप्य पञ्चदुर्गाभिः प्रदक्षिणनमस्कारं आचार्या-र्त्विग्भ्यश्च दक्षिणां दद्यादथ ब्राह्मणान्भोजयेत् ।

Colophon :

। गौरीप्रतिष्ठा समाप्ता ।

D. No. 16601.

Pages, 2. Lines, 9 in a page. Extent, 20 Granthas.

विनायकसुब्रह्मण्यप्रतिष्ठा

VINĀYAKASUBRAHMAṆYAPRATIṢṬHĀ.

Begins on foll. 53*b* of the MS. described under D. No. 16567.

On the consecration of Lords Gaṇeśa and Subrahmaṇya.

Complete.

Beginning :

अथ विनायकप्रतिष्ठा रुद्रप्रतिष्ठेव कार्या रुद्रमन्त्रस्थाने तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि इति गायत्रीमन्त्रः । गणानां एवेति वा विनायकगायत्र्या वा षोडशपूजां कुर्यात् ।

End :

तथैव सुब्रह्मण्यप्रतिष्ठा च । स्कन्दमन्त्रः । क्षेत्रस्य पतिना वयं क्षेत्रस्य पते मधुमन्तमिति द्वाभ्यां पूजयेत् ।

Colophon :

। इति विनायकसुब्रह्मण्यप्रतिष्ठा समाप्ता ।

D. No. 16602.

Pages, 2. Lines, 9 in a page. Extent, 16 Granthas.

श्रीभूमिप्रतिष्ठा

ŚRĪBHŪMIPRATIṢṬHĀ.

Begins on foll. 54*a* of the MS. described under D. No. 16567.

Gives details regarding the consecration of Śrīdevī and Bhūdevī.

Complete.

Beginning :

अथ भूमिप्रतिष्ठा विष्णुना सहैव कार्या । पृथक्करणे पूर्वपक्षस्य पञ्चम्यां पौर्णमास्यां वा शुभदिने वा कर्तव्या । सर्वं विष्णुप्रतिष्ठावत् होमं विना चरेत् । ओं भूः श्रियं देवीमावाहयामीत्यादिभिः रुद्रमन्त्र-स्थाने धनुर्धराय विद्महे सर्वसिद्धी च धीमहि तन्नो धरा प्रचोदयात् ।

End :

क्षुत्पिपासामिति मन्त्रेण स्विष्टकृदादि समाप्य देवीं प्रदक्षिणनमस्कारं सूक्तद्वयेन कुर्यात् । आचार्याय गां दत्वा सहिरण्यवस्त्रामृत्विग्भ्यो दक्षिणां दद्यात् । ब्राह्मणान् भोजयेत् । तदुक्तगायत्र्या वा सर्वपूजां कुर्यात्प्राज्ञः ।

Colophon :

। इति श्रीदेवीभूदेवीप्रतिष्ठा समाप्ता ।

D. No. 16603.

Pages, 4. Lines, 9 in a page. Extent, 50 Granthas.

कूपतटाकारामादिप्रतिष्ठा

KŪPATAṬĀKĀRĀMĀDIPRATIṢṬHĀ.

Begins on foll. 54*b* of the MS. described under D. No. 16567.

On the consecration of wells, tanks, gardens and others.

Complete.

Beginning :

सेतुबन्धनदीर्घिकातटाकपुष्करिणीवापीकूपदेवगृहप्रासादप्रभृतीनां ग्रामौ-षधिवनस्पतीनामुत्पादितानां पूर्तं भवति । उदगयनापूर्यमाणपक्षे पुण्ये नक्षत्रे द्विजानां मात्री होमः । नमस्काराद्द्विजपूजादि शूद्रस्य । अथ तटाकादीनां पूर्वतीरे पुरस्तान्मध्ये स्थण्डिलं कृत्वा तस्य पुरस्तादवटं खात्वा त्रिरत्निमात्रं पालाशं खादिरं वा यूपमध्वर्युर्यजमानश्च सह स्थापयेत् ।

End :

नृत्तगीतवाद्यघोषदेवदुन्दुभिस्वस्त्ययनैः ग्रामं प्रदक्षिणीकृत्य गृहं गत्वा ब्राह्मणान्भोजयेत् । तेषां नष्टानां पुनः करणे तत्तुच्छतत्फलं षष्टिर्वर्षसहस्राणि ब्रह्मलोके महीयते ।

Colophon :

। इति कूपतटाकारामप्रासादादिप्रतिष्ठाविधिः समाप्तः ।

D. No. 16604.

Page, 1. Lines, 9 in a page. Extent, 7 Granthas,

रविकल्पः

RAVIKALPAḤ.

Begins on foll. 56*a* of the MS. described under D. No. 16567.

Gives details regarding the worship of the sun.

Incomplete.

Beginning :

अथातो रविकल्पं व्याख्यास्यामः । मण्डलं चतुरश्रं वा गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्य कृत्वा चत्वारिंशत्कृत्वो रविवारे ताम्रपात्रे रक्तगन्धपुष्पं वा घृणिः सूर्य आदित्य इत्यावाहच

End :

तर्पयामीति तैरेव नामधेयैर्गन्धपुष्पधूपदीपैरमुष्मै नमोऽमुष्मै नम इत्य

D. No. 16605.

Pages, 3. Lines, 9 in a page. Extent, 16 Granthas.

शनैश्चरशान्तिः

ŚANAIŚCARAŚĀNTIḤ.

Begins on foll. 56*b* of the MS. described under D. No. 16567.

On the ceremony to be performed to propitiate the planet Saturn.

Complete.

Beginning :

नारद उवाच—

कथं राजा दशरथः शनिना पीडितो भृशम् ।
एतन्मे संशयं ब्रूहि सूत सर्वार्थकोविद ॥

सूतः

राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
राज्यं शशास धर्मात्मा प्रजा धर्मेण पालयन् ॥
एकदास्य तु राज्ञस्तु शनिर्द्वादशराशिजः ।
तस्य पीडा समजनि राज्यं दुर्भिक्षसंयुतम् ॥
मम पीडाच महती किमेतन्मुनिसत्तम ।

वसिष्ठ उवाच—

तव द्वादशराशिस्थः शनिः पीडाकरो महान् ।
राज्यं दुर्भिक्षसंयुक्तं शनिदोषसमुद्भमात् ॥

End :

एतानि दशनामानि मम जप्यन्तु भूपते ।
मम मूर्तिं जापित्वैव अश्वत्थस्य प्रदक्षिणम् ॥
ब्राह्मणैः कारयेद्भक्त्या यथाशक्ति विधानतः ।
सूतः—एवं यः कुरुते शुद्धः सुखीभवति नारद ।

Colophon :

इति ब्रह्माण्डपुराणे शनैश्चरदशरथसंवादो नाम पञ्चाशच्छतत-मोऽध्यायः । शनैश्चरशान्तिः समाप्तः ।

D. No. 16606.

Page, 1. Lines, 9 in a page. Extent, 5 Granthas.

दुःस्वप्नशान्तिः

DUSSVAPNAŚĀNTIḤ.

Begins on foll. 57*b* of the MS. described under D. No. 16567.

Same work as that described under D. No. 3336 but different end.

Complete.

End :

गवां शान्तिरित्याचक्षते द्विपदश्चतुष्पदानां चैतदेव व्याख्यातमिती हस्माह बोधायनः ।

D. No. 16607.

Pages, 3. Lines, 6 in a page. Extent, 20 Granthas.

नारायणबलिः
NĀRĀYAṆABALIḤ.

Begins on foll. 58*a* of the MS. described under D. No. 16567.

Same work as that described under D. No. 3659, but different readings.

Complete.

Beginning :

अथातो नारायणबलिं व्याख्यास्यामः । दक्षिणोत्तरायणयोरपरपक्षस्य द्वादश्यां क्रियेत । पूर्वेद्युर्द्वादश षड्वा ब्राह्मणान्निमन्त्रयते । योनिगोत्र-श्रुतवृत्तसम्पन्नान थापरेद्युर्देवालये नदीतीरे वाग्निमुपसमाधाय संपरिस्ती-र्यप्रणीताश्चः ।

End :

नमो वासुदेवाय नमः सर्वेश्वरायनमः सवपुरुषाय नम इति स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात् सर्वान्समधिगच्छति ब्रह्मलोके महीयते ब्रह्मलोके महीयत इत्याह भगवान्बोधायनः ।

D. No. 16608.

Pages, 6. Lines, 9 on a page. Extent, 55 Granthas.

रामप्रतिष्ठाविधिः
RĀMAPRATIṢṬHĀVIDHIḤ.

Begins on foll. 59*a* of the MS. described under D. No. 16567.

Gives details regarding the consecration of the idol of Lord Rāma.

Complete.

Beginning :

अथ वैदिकोक्तं रामप्रतिष्ठाविधिं व्याख्यास्यामः ।
सौवर्णैर्वाथरजतैस्ताम्रैर्वा दृषदै द्रुमैः ।
प्रतिमां कारयेद्धीमान्सर्वशिल्पमनोहराम्
रामं च कारयित्वाग्रे सीतालक्ष्मणसंयुतम् ॥
हनूमन्तमथोत्पाद्य सर्वलक्षणसंयुतम् ॥

अथ पूर्वाह्नि स्नात्वा कृत्वा चावश्यकं द्विजः ।
कर्ता संकल्प्य विधिवत्प्रतिमां स्थापयेज्जले ।

End :

एवं प्रतिष्ठाप्य गृहे गृही रामं सलक्ष्मणम् ।
सीतां च हनुमन्तं च प्रत्यहं पूजयेत्ततः ॥
इहभुक्त्वाखिलान्भोगानन्ते रामपदं व्रजेत् ।
वैदिकेन विधिः प्रोक्तः प्रतिष्ठायां द्विजन्मनाम् ॥

Colophon :

इति हिरण्यगर्भसिद्धान्ते रहस्ये श्रीरामचन्द्रप्रतिष्ठाविधिर्नामैकविंशो ऽध्यायः ।

After the end there are few lines in Rāmabhūmi, Lakṣmi, sarpagāyatr Anantagāyatryād yaḥ.

D. No. 16609.

Pages, 6. Lines, 9 in a page. Extent, 24 Granthas.

गण्डान्तशान्तिः

GAṆḌĀNTAŚĀNTIḤ.

Begins on foll. 61*b* of the MS. described under D. No. 16567.
Similar to the work that described under D. No. 3286.
Complete.

Beginning :

गण्डान्तशान्तिरत्रैव प्रोच्यते तु विशेषतः ।
आश्लेषान्तं मघात्पूर्वं ज्येष्ठान्तं मूलपूर्वकम् ॥
रेवत्याश्विनोर्मध्ये तोरगण्डान्तमुच्यते ।
गण्डान्तस्य प्रमाणं तु नाडिकानां चतुष्टयम् ॥
उभयोरपि तन्मुख्यं गण्डान्तमिति चोदितम् ॥
पञ्चमीषष्ठिमध्ये तु दशम्येकादशी तथा ॥
पूर्वप्रतिपदोर्मध्ये तिथिगण्डान्तमुच्यते ।
शूलान्ते गण्डयोगादौ वर्यान्परिघमध्यके ॥

End :

सर्वदोषान्व्यपोहतु शिशुं रक्षतु सर्वदा ।
इत्युपस्थाय तत्पश्चात्प्रतिमादानमाचरेत् ॥

दानमन्त्रः—

मृत्युञ्जयाख्यप्रतिमां गण्डान्तरूपिणीमिमाम ।
तुभ्यं सम्प्रददे विप्र सर्वदोषैः सहैव मे ॥
इति दत्वा तथाचार्यं सम्पूज्य ब्राह्मणांस्तथा ।
ब्राह्मणान्भोजयित्वाथ सर्वारिष्टात्प्रमुच्यते ॥

Colophon :

। इति गण्डान्तशान्तिः समाप्ता ।

D. No 16610.

Pages, 8. Lines, 9 in a page. Extent, 39 Granthas.

यतिसंस्कारप्रयोगः

YATISAṀSKĀRAPRAYOGAḤ.

Begins on foll. 62*b* of the MS. described under D. No. 16567.
Similar to the work described under D. No. 3767.
Complete.

End :

पुनस्तूष्णीमुदकं देवतीर्थेन दत्वातो देवा' इति षड्भिः पिण्डोपस्थानं कृत्वा परिध्यञ्जना दुपस्थानान्तं कुर्यात् ।

एवं यः कुरुते विद्वान्नारायणबलिं द्विजः ।
विष्णुलोकमवाप्नोति पुरुषो नात्र संशयः ॥

Colophon :

। इति नारायणबलिः समाप्तः ।

D. No. 16611.

Pages, 3. Lines, 9 in a page. Extent, 20 Granthas.

गुरुशान्तिः

GURUŚĀNTIḤ.

Begins on foll. 66*a* of the MS. described under D. No. 16567.

On the ceremony to be performed by a person in whose jātaka, the plant Jupiter occupies the eighth mansion to ward off the evil consequences arising therefrom.

Complete.

Beginning :

अष्टमस्थो गुरुर्यस्य सुतभार्याधनक्षयः ।
बन्धनं देहपीडा च न वेधश्चेद्भविष्यति ॥
तस्य शान्ति प्रवक्ष्यामि गार्ग्येणोक्तं यथाविधि ।
देवालये गृहे वापि शुचौ देशे समाहितः ॥
गोचर्ममात्रमालिप्य गोमयेन विचक्षणः ।
मण्डलं कारयेत्तत्र चतुरश्रसमन्वितम् ॥
मण्डलस्य पुरस्तात्तु कुम्भं संस्थापयेद्बुधः ।
नवरत्नसुसंयुक्तं नववस्त्रेण वेष्टितम् ॥

End :

एवं यः कुरुते शान्ति स चिरायुः सुखी भवेत् ।
आपदस्तस्य नश्यान्ति सम्पच्चापि विवर्धते ॥
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥
जन्मषष्ठतृतीये च व्यये कर्मणि च स्थिते ॥
एवं शान्ति तथा कुर्याद्ग्रहयज्ञं समापयेत् ।
दश दानानि वै कुर्यादाज्यावेक्षणमेव च ॥

Colophon :

। इति गुरुशान्तिः समाप्ता ।

D. No. 16612.

Pages, 2. Lines, 9 in a page. Extent, 13 Granthas.

काकमैथुनदर्शनशान्तिः

KĀKAMAITHUNADARŚANAŚĀNTIḤ.

Begins on foll. 67*a* of the MS. described under D. No. 16567.

Same work as that described under D. No. 3265 but with different readings.

Complete.

Beginning :

दिवा वा यदि वा रात्रौ यः पश्चेत्काकमैथुनम् ।
स नरो मृत्युमाप्नोति यद्वापि स्थाननाशनम् ॥

जितेन्द्रियः शुद्धमनाः सत्यधर्मपरायणः ।
पितन्देवान्द्विजान्भक्त्या प्रत्यहं चाभिवादनम् ॥
तद्दोषशमनार्थाय शान्तिं कर्म समाचरेत् ।
शान्तिहीनस्तु यो मूढः षण्मासात्तत्फलं लभेत् ॥

End :

वस्त्राद्यलङ्कृतां धेनुं सवत्सां दक्षिणायुताम् ।
सम्यग्वित्तानुसारेण श्रोत्रियाय कुटुम्बिने ॥
आचार्याय दरिद्राय दद्यात्तद्दोषशान्तये ।
ब्राह्मणान्भोजयित्वाथ आशिषो वाचयेद् द्विजैः ॥

Colophon :

इति काकमैथुनदर्शनशान्तिः समाप्ता ।

D. No. 16613.

Pages, 2. Lines, 9 in a page. Extent, 21 Granthas.

सिनीवालिशान्तिः

SINĪVĀLĪŚĀNTIḤ.

Begins on foll. 67*b* of the MS. described under D. No. 16567.

On the ceremony to be performed to a woman or cow or any other animal which gives birth to a young one on the day preceding that of new moon in order to prevent the evil consequences arising therefrom. The term 'Sinīvalī' is defined thus :—

"या पूर्वामावास्या सा सिनीवाली"

Aitareya Brāhmaṇa.

Complete.

Beginning :

सिनीवाल्यां प्रसूता स्याद्यस्य भार्या पशुस्तथा ।
गजाश्वमहिषाद्याश्च शक्रस्यापि श्रियं हरेत् ॥
परित्यागं तत्र शान्तिं कुर्याद्धीमान्विचक्षणः ।
न त्यजेद्यदि तन्मोहादर्थादज्ञानतोऽपि वा ॥
तद्यूथं नाशयेत्किंच स्वयं वैनाशमश्नुते ।
नवग्रहमखं कृत्वा शान्तिं कुर्याद्विचक्षणः ॥

End :

तत्तोयेनाभिषिक्ताङ्गः सर्वदोषान्व्यपोहतु ।
सवस्त्रप्रतिमां चैव आचार्याय सदक्षिणम् ॥
ऋत्विग्भ्यो दक्षिणां दद्यादाज्यावेक्षणमेव च ।
दश दानं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ॥

Colophon :

इति सिनीवालीशान्तिः समाप्ता ।

D. No. 16614.

Pages, 2. Lines, 9 in a page. Extent, 15 Granthas.

नरपतनशान्तिः

NARAPATANŚĀNTIḤ.

Begins on foll. 69*a* of the MS. described under D. No. 16567.

Same work as that described under R. No. 49 (*c*) but different end.

Complete.

End :

दद्याद्वित्तानुसारेण आज्यावेक्षणमेव च ।
दशदानादिकं कुर्यादाचार्याय विशेषतः ॥
ऋत्विग्भ्यो दक्षिणां दद्याद्ब्राह्मणान्भोजयेत्ततः ।
एवं कृते स निर्दोषो भवतीति बृहस्पतिः ॥

Colophon :

। इत्युत्पलपरिमले नरपतनशान्तिः समाप्ता ।

D. No. 16615.

Pages, 2. Lines, 9 in a page. Extent, 18 Granthas.

आयुष्यहोमः

ĀYUṢYAHOMAḤ.

Begins on foll. 69*a* of the MS. described under D. No. 16567.

Similar to the work described under D. No. 3553.

Complete.

Beginning :

अथात आयुष्यहोमं व्याख्यास्यामः । संवत्सरे संवत्सरे षट्सु षट्सु मासेषु चतुर्षु चतुर्षु ऋताबृतौ मासि मासि वा कुमारस्य जन्मनक्षत्रे क्रियेत । संकल्पपुण्याहं कृत्वाथ देवयजनोल्लेखनप्रभृत्यग्निमुखात्कृत्वा पक्वान्जुहोति ।

End :

एतैरेवाहुतीर्जुहुयादेतैरेव मन्त्रैर्बलीन्हरेदेतैरेवमन्त्रैर्भस्मना रक्षां कुर्यादगदो हैव भवतीत्याह भगवान् बोधायनः ।

D. No. 16616.

Pages, 4. Lines, 9 in a page. Extent, 133 Granthas.

सर्वारिष्टशान्तिः

ŚARVĀRIṢṬAŚĀNTIḤ.

Begins on foll. 69*b* of the MS. described under D. No. 16567.
Similar to the work described under D. No. 3461.
Complete.

Beginning :

सर्वारिष्टविनाशाय शान्ति वक्ष्ये यथाविधि ।
पूर्वाषाढं च पुष्यं च ज्येष्ठाश्विनमखांस्तथा ॥
अर्यमाद्ययमाद्यंशं चित्रापूर्वार्धमेव च ।
आश्लेषान्ते त्रिपादं तु मूलादौ त्रिपदं तथा ॥
पित्रोर्जन्मर्क्षकं विद्याज्जन्ममासं च तत्तिथिम् ।
कर्मर्क्षे चैव तल्लग्ने ह्याधानर्क्षे तथैव च ॥

End :

विप्रप्रसादाद्विजदेवताभ्यो
गोभूहिरण्यादिसुवर्णदानम् ।
तीर्थाभिषेको गृहयज्ञभुक्ति-
र्यन्त्राश्च रक्षाश्च न ह ष्टः (?) ॥
ततः स जातकर्मादि कुर्याद्ब्राह्मणसन्निधौ ।
दिशा कर्म कृता यस्य सद्योरिष्टं विनश्यति ।
पितृमातृसुतभ्रातृमातुलानां सुखं भवेत् ।

Colophon :

। इति सर्वारिष्टशान्तिः समाप्ता ।

D. No. 16617.

Pages, 3. Lines, 9 in a page. Extent, 30 Granthas.

चन्द्रसूर्यग्रहणशान्तिः

CANDRASŪRYAGRAHAṆAŚĀNTIḤ.

Begins on foll. 70*a* of the MS. described under D. No. 16567.

Similar work as that described under D. No. 14431.

Complete.

Beginning :

यस्य त्रिजन्मनक्षत्रे राशौ वा जन्मलग्नके ।
पार्श्वनक्षत्रे वाथ प्रत्यरेषु विपद्वये ।
ग्रहणं तु भवेत्तस्य सद्यो मृत्युर्भविष्यति ।
अतस्तद्दोषशान्त्यर्थं शान्तिहोमं समाचरेत् ।
कर्ता तु निष्कप्रामाण्यां प्रतिमां कारयेद्बुधः ।
पञ्चद्रोणमितं धान्यं तदर्धं तण्डुलं तिलान् ॥
उपर्युपरिनिक्षिप्य पञ्च कुम्भान्निधाय च ॥

End :

योऽसाविन्द्रधरो देवः पिनाकीवृषवाहनः ।
चन्द्रोपरागपापानि विनाशयतु शङ्करः ॥
प्रेक्ष्याथ तत्तत्कुम्भाद्भिरभिषिञ्चन्तु ते द्विजाः ।
दद्यात्सवस्त्रकुम्भं च प्रतिमां च सदक्षिणाम् ॥
आचार्यायाथ ऋत्विग्भ्यो दक्षिणा च प्रदीयते ।
दशदानादिकं कृत्वा ब्राह्मणान्भोजयेत्ततः ॥
ग्रहपीडाविनिर्मुक्तः दीर्घायुश्च सुखी भवेत् ।

Colophon :

। इति चन्द्रसूर्यग्रहणशान्तिः समाप्ता ।

D. No. 16618.

Pages, 2. Lines, 9 in a page. Extent, 15 Granthas.

अश्वत्थोपनयनविधिः

AŚVATTHOPANAYANAVIDHIḤ.

Begins on foll. 71*a* of the MS. described under D. No. 16567.

Similar to the work described under D. No. 8212.

Complete.

Beginning :

अथातोऽश्वत्थोपनयनं व्याख्यास्यामः । उदगयने यथाकामी स्यात्पुण्ये नक्षत्रे ब्राह्मणान्भोजयित्वाशिषो वाचयित्वा प्रदक्षिणमश्वत्थं परिसमूह्याश्वत्थे वो निषदनमिति मन्त्रेणाश्वत्थमभ्यर्च्य यज्ञोपवीतं परिमुञ्चति ।

End :

नमोऽस्तु नीलग्रीवायेति पक्कादुपदानिदेयति तूष्णीं सर्वमन्त्रानाचार्थ एवं जपेदाचार्याय वस्त्रहिरण्यादीनि दद्याद्ब्राह्मणान्भोजयेदित्याह भगवान्बोधायनः ।

D. No. 16619.

Pages, 2. Lines, 9 in a page. Extent, 10 Granthas.

संक्रमशान्तिः

ŚAṄKRAMAŚĀNTIḤ.

Begins on foll. 71*b* of the MS. described under D. No. 16567.

On the ceremony to be performed in the case of a person in whose natal lunar mansion or neighbouring lunar mansions, there occurs the sun's entrance from one Zodaical sign to another in order to ward off the evil consequences arising therefrom.

Complete.

Beginning :

यस्य स्वजन्मराशौ वा पार्श्वर्क्षेषु त्रिजन्मसु ।
यदि संक्रमणं तस्य मरणं च भविष्यति ॥
दौर्भाग्यं सन्ततं तस्य धनहानिर्भविष्यति ।
तस्मात्सर्वप्रयत्नेन शान्तिकर्म समाचरेत् ॥
आचार्यं वरयेत्पूर्वं सर्वज्ञं वेदपारगम् ।
व्रीहिद्रोणप्रमाणेन स्थण्डिलं कल्पयेद्बुधः ॥
उपर्युपरिनिक्षिप्य तदर्धं तण्डुलैस्तिलैः ।
नव कुम्भान्समादाय स्थापयेच्च यथाक्रमम् ॥

End

आदावन्ते च पुण्याहं वाचयेत्पञ्चभिर्द्विजैः ।
एवं यः कुरुते विद्वान् . . . . . संक्रमशान्तिकम् ॥
रुद्राभिषेचनं चैव अन्ते ब्राह्मणभोजनम्
सर्वान्कामानवाप्नोति जीवेच्च शरदां शतम् ॥

Colophon :

। इति शौनकीये संक्रमशान्तिः समाप्ता ।

D. No. 16620.

Pages, 4. Lines, 9 in a page. Extent, 15 Granthas.

शनैश्चरशान्तिः

ŚANAIŚCARAŚĀNTIḤ.

Begins on foll. 72*b* of the MS. described under D. No. 16567.
Similar to the work described under D. No. 16605.
Complete.

Beginning :

अथ शान्तिं प्रवक्ष्यामि मन्दे जन्मर्क्षसम्भवे ।
क्लेशायुरर्थहानिश्च नानारोगसमुद्भवः ॥
तस्माच्छान्तिं प्रकुर्वीत वित्तशाठ्यविवर्जितः ।
गृहस्यैशानदिग्भागे गोमयालेपिते शुभे ॥
आचार्यं वरयेत्पूर्वं ब्राह्मणं वेदपारगम् ।
भूमौ कृष्णतिलैः पश्चाच्चतुर्दशदलान्वितम् ॥
पद्मं प्रकारयेत्सम्यगाचार्यो भक्तिभावनः ।
तन्मध्ये स्थापयेत्कुम्भं नीलवस्त्रसमावृतम् ॥

End :

गोभूहिरण्यवस्त्राद्यैराचार्यं परितोषयेत् ।
तिलदानं प्रकुर्वीत ऋत्विग्भ्यो दक्षिणां तथा ॥
ब्राह्मणान्भोजयेत्पश्चान्मुक्तो रोगभयैस्तु सः ।
सर्वान्कामानवाप्नोति सुखी भवति सर्वदा ॥

Colophon :

॥ इति शनैश्चरशान्तिः समाप्ता ॥

D. No. 16621.

Pages, 2. Lines, 9 in a page. Extent, 3 Granthas.

एकनक्षत्रशान्तिः

EKANAKṢATRAŚĀNTIḤ.

Begins on foll. 73*a* of the MS. described under D. No. 16567.
Similar to the work that described under D. No. 3259.
Complete.

Beginning :

यस्मिन्मासे पितुर्जन्म तन्मासेऽपि च तत्तिथौ ।
जन्मर्क्षे जन्मलग्ने वा राशौ वाथ तथैव च ॥
पित्रोर्मरणमित्याहुर्जायते पुत्रिपुत्रयोः ।
तत्सर्वदोषनाशाय शान्तिं कुर्याद्विचक्षणः ॥
शुक्लपक्षे शुभेवारे रिक्ताविष्टि (?) विवर्जयेत् ।
आचार्यं वरयेत्पूर्वं पुण्याहं च ततः परम् ॥
व्रीहिद्रोणं विनिक्षिप्य तण्डुलं तु तदर्धकम् ।
तदर्धं तु तिलं चैव उपर्युपरि निक्षिपेत् ॥

End :

ततो भूषणवस्त्राद्यैराचार्यं परितोषयेत् ।
ऋत्विग्भ्यो दक्षिणां दद्यात्प्रतिमां च ददेत्ततः ॥
दशदानं ततः कृत्वा ततो रुद्राभिषेचनम् ।
ब्राह्मणान्भोजयेत्पश्चाद्यथावित्तानुसारतः ॥
एवं यः कुरुते स (?) चैकनक्षत्रशान्तिकम् ।
सर्वान्कामानवाप्नोति जीवेच्च शरदां शतम् ॥

Colophon :

॥ इत्येकनक्षत्रशान्तिः समाप्ता ॥

D. No. 16622.

Pages, 3. Lines, 9 in a page. Extent, 13 Granthas.

वरुणजपः

VARUṆAJAPAH.

Begins on foll. 74*a* of the MS. described under D. No. 16567.
Similar to the work described under R. No. 648 (*d*).
Complete.

Beginning :

अथ महापर्जन्यसूक्तजपं व्याख्यास्यामः । यस्मिन्देशे अनावृष्टिः स्यात्तस्मिन्देशे सद्यः सुवृष्टयर्थं महापर्जन्यसूक्तजपं करिष्ये इति संकल्प्य महागणपतिपूजां कृत्वा महापर्जन्यसूक्तजपार्थं द्वादश ब्राह्मणान्नियम्या-चार्यवरणं च कृत्वा ऋत्विग्भिः सहाचार्य आकर्णदघ्नजले जपेत् ।

End :

नमो ब्रह्मणे इत्येताननुवाकान्जपित्वाथ वासांस्याचार्याय निवेदयेदथ ऋत्विग्भ्यो दक्षिणां दद्याद्वरुणप्रीत्यर्थमष्टोत्तरसहस्रमष्टोत्तरशतं वा ब्राह्मणा-न्भोजयेत्

D. No. 16623.

Pages, 2. Lines, 9 in a page. Extent, 66 Granthas.

श्रीरामनवमीकल्पः

ŚRĪRĀMANAVAMĪKALPAḤ.

Begins on foll. 74*b* of the MS. described under No. 16567.
Similar to the work described under D. No. 8437.
Complete.

Beginning :

वन्दे गणपतिं देवं गुरुवागधिदैवतम् ।
क्षेत्रपालं तथा दुर्गां शम्भुमीशं सदाशिवम् ॥

अगस्त्य उवाच—

हिरण्यगर्भसिद्धान्ते रहस्ये मुनिसत्तम ।
पूजाविधानं वक्ष्यामि रामचन्द्रस्य नारद ॥

१. अथ ध्यानम्—

हृत्पुण्डरीके योगीश यं देवमनुचिन्तयन् ।
. . . . श्रीरामचन्द्रस्य नारद ॥

अथ ध्यानम्—

हृत्पुण्डरीके योगीश यं देवमनुचिन्तयन् ।
श्रीरामं जानकीनाथमिन्द्रनीलसमप्रभम् ॥

किरीटहारकेयूरज्वलन्मकरकुण्डलम् ।
रत्नकङ्कणसौवर्णग्रैवेयैरप्यलङ्कृतम् ॥

End :

अथपूजान्तप्रार्थना
नारायणायानन्ताय श्रीराम करुणानिधे ।
मामुद्धर हृशीकेश घोरसंसारसागरात् ॥
राम (राम) महीपाल शरणत्राणतत्पर ।
मां पाहि सर्वलोकेश तापत्रयमहार्णवात् ।

ब्रह्मा—

. . . . . . कविज्ञानं त्वन्नामस्मरणं तदा ।
त्वत्पादाम्भोजसद्भक्तिं देहि मे रघुनन्दन ॥

Colophon :

॥ इति श्रीरामनवमीकल्पः समाप्तः ॥

D. No. 16624.

Pages, 2. Lines, 9 in a page. Extent, 19 Granthas.

गौलीपतनशान्तिः

GAUḶĪPATANAŚĀNTIḤ.

Begins on foll. 77*b* of the MS. described under No. 16567.

Same work as that described under D. No. 3295 but different end.

Complete.

End :

